**Purusha Suuktam**

puruṣa sūktaṃ
(Purusha Sooktam)

oṃ taccaṃ yorāvṛ’ṇīmahe | gātuṃ yaṅñāya’ | gātuṃ yaṅñapa’taye | daivī”
svastira’stu naḥ | svastirmānu’ṣebhyaḥ |
ūrdhvaṃ ji’gātu bheṣajam | śaṃ no’ astu dvipade” | śaṃ catu’ṣpade |
oṃ śāṃtiḥ śāṃtiḥ śāṃtiḥ’ ||
sahasra’śīrṣā puru’ṣaḥ | sahasrākṣaḥ sahasra’pāt |
sa bhūmiṃ’ viśvato’ vṛtvā | atya’tiṣṭhaddaśāṃguḷam ||
puru’ṣa evedagm sarvam” | yadbhūtaṃ yacca bhavyam” |
utāmṛ’tatva syeśā’naḥ | yadanne’nātiroha’ti ||
etāvā’nasya mahimā | ato jyāyāg’śca pūru’ṣaḥ |
pādo”sya viśvā’ bhūtāni’ | tripāda’syāmṛtaṃ’ divi ||
tripādūrdhva udaitpuru’ṣaḥ | pādo”syehābha’vātpunaḥ’ |
tato viṣvaṇ-vya’krāmat | sāśanānaśane abhi ||
tasmā”dvirāḍa’jāyata | virājo adhi pūru’ṣaḥ |
sa jāto atya’ricyata | paścād-bhūmimatho’ puraḥ ||
yatpuru’ṣeṇa haviṣā” | devā yaṅñamata’nvata |
vasaṃto a’syāsīdājyam” | grīṣma idhmaśśaradhdhaviḥ ||
saptāsyā’san-paridhayaḥ’ | triḥ sapta samidhaḥ’ kṛtāḥ |
devā yadyaṅñaṃ ta’nvānāḥ | aba’dhnan-puru’ṣaṃ paśum ||
taṃ yaṅñaṃ barhiṣi praukṣan’ | puru’ṣaṃ jātama’grataḥ |
tena’ devā aya’jaṃta | sādhyā ṛṣa’yaśca ye ||
tasmā”dyaṅñāt-sa’rvahutaḥ’ | saṃbhṛ’taṃ pṛṣadājyam |
paśūg-stāgśca’kre vāyavyān’ | āraṇyān-grāmyāśca ye ||
tasmā”dyaṅñātsa’rvahutaḥ’ | ṛcaḥ sāmā’ni jaṅñire |
chaṃdāgm’si jaṅñire tasmā”t | yajustasmā’dajāyata ||
tasmādaśvā’ ajāyaṃta | ye ke co’bhayāda’taḥ |
gāvo’ ha jaṅñire tasmā”t | tasmā”jjātā a’jāvayaḥ’ ||
yatpuru’ṣaṃ vya’dadhuḥ | katithā vya’kalpayan |
muk_haṃ kima’sya kau bāhū | kāvūrū pādā’vucyete ||
brāhmaṇo”sya muk_ha’māsīt | bāhū rā’janyaḥ’ kṛtaḥ |
ūrū tada’sya yadvaiśyaḥ’ | padbhyāgm śūdro a’jāyataḥ ||
caṃdramā mana’so jātaḥ | cakṣoḥ sūryo’ ajāyata |
muk_hādiṃdra’ścāgniśca’ | prāṇādvāyura’jāyata ||
nābhyā’ āsīdaṃtari’kṣam | śīrṣṇo dyauḥ sama’vartata |
padbhyāṃ bhūmirdiśaḥ śrotrā”t | tathā’ lokāgm aka’lpayan ||
vedāhame’taṃ puru’ṣaṃ mahāṃtam” | ādityava’rṇaṃ tama’sastu pāre |
sarvā’ṇi rūpāṇi’ vicitya dhīraḥ’ | nāmā’ni kṛtvābhivadan, yadāste” ||
dhātā purastādyamu’dājahāra’ | śakraḥ pravidvān-pradiśaścata’sraḥ |
tamevaṃ vidvānamṛta’ iha bha’vati | nānyaḥ paṃthā aya’nāya vidyate ||
yaṅñena’ yaṅñama’yajaṃta devāḥ | tāni dharmā’ṇi prathamānyā’san |
te ha nākaṃ’ mahimānaḥ’ sacaṃte | yatra pūrve’ sādhyāssaṃti’ devāḥ ||
adbhyaḥ saṃbhū’taḥ pṛthivyai rasā”cca | viśvaka’rmaṇaḥ sama’vartatādhi’ |
tasya tvaṣṭā’ vidadha’drūpame’ti | tatpuru’ṣasya viśvamājā’namagre” ||
vedāhametaṃ puru’ṣaṃ mahāṃtam” | ādityava’rṇaṃ tama’saḥ para’stāt |
tamevaṃ vidvānamṛta’ iha bha’vati | nānyaḥ paṃthā’ vidyateya’nāya ||
prajāpa’tiścarati garbhe’ aṃtaḥ | ajāya’māno bahudhā vijā’yate |
tasya dhīrāḥ pari’jānaṃti yonim” | marī’cīnāṃ padamicchaṃti vedhasaḥ’ ||
yo devebhya āta’pati | yo devānāṃ” purohi’taḥ |
pūrvo yo devebhyo’ jātaḥ | namo’ rucāya brāhma’ye ||
rucaṃ’ brāhmaṃ janaya’ṃtaḥ | devā agre tada’bruvan |
yastvaivaṃ brā”hmaṇo vidyāt | tasya devā asan vaśe” ||
hrīśca’ te lakṣmīśca patnyau” | ahorātre pārśve |

nakṣa’trāṇi rūpam | aśvinau vyāttam” |
iṣṭaṃ ma’niṣāṇa | amuṃ ma’niṣāṇa | sarvaṃ’ maniṣāṇa ||

taccaṃ yorāvṛ’ṇīmahe | gātuṃ yaṅñāya’ | gātuṃ yaṅñapa’taye | daivī”
svastira’stu naḥ |
svastirmānu’ṣebhyaḥ | ūrdhvaṃ ji’gātu bheṣajam | śaṃ no’ astu dvipade” | śaṃ
catu’ṣpade |
oṃ śāṃtiḥ śāṃtiḥ śāṃtiḥ’ ||

पुरुष सूक्तं (Purusha Sooktam)

ॐ तच्चं योरावृ’णीमहे । गातुं यङ्ञाय’ । गातुं यङ्ञप’तये । दैवी” स्वस्तिर’स्तु नः । स्वस्तिर्मानु’षेभ्यः ।
ऊर्ध्वं जि’गातु भेषजम् । शं नो’ अस्तु द्विपदे” । शं चतु’ष्पदे ।
ॐ शांतिः शांतिः शांतिः’ ॥
सहस्र’शीर्षा पुरु’षः । सहस्राक्षः सहस्र’पात् ।
स भूमिं’ विश्वतो’ वृत्वा । अत्य’तिष्ठद्दशांगुळम् ॥
पुरु’ष एवेदग्म् सर्वम्” । यद्भूतं यच्च भव्यम्” ।
उतामृ’तत्व स्येशा’नः । यदन्ने’नातिरोह’ति ॥
एतावा’नस्य महिमा । अतो ज्यायाग्’श्च पूरु’षः ।
पादो”स्य विश्वा’ भूतानि’ । त्रिपाद’स्यामृतं’ दिवि ॥
त्रिपादूर्ध्व उदैत्पुरु’षः । पादो”स्येहाभ’वात्पुनः’ ।
ततो विष्वण्-व्य’क्रामत् । साशनानशने अभि ॥
तस्मा”द्विराड’जायत । विराजो अधि पूरु’षः ।
स जातो अत्य’रिच्यत । पश्चाद्-भूमिमथो’ पुरः ॥
यत्पुरु’षेण हविषा” । देवा यङ्ञमत’न्वत ।
वसंतो अ’स्यासीदाज्यम्” । ग्रीष्म इध्मश्शरध्धविः ॥
सप्तास्या’सन्-परिधयः’ । त्रिः सप्त समिधः’ कृताः ।
देवा यद्यङ्ञं त’न्वानाः । अब’ध्नन्-पुरु’षं पशुम् ॥
तं यङ्ञं बर्हिषि प्रौक्षन्’ । पुरु’षं जातम’ग्रतः ।
तेन’ देवा अय’जंत । साध्या ऋष’यश्च ये ॥
तस्मा”द्यङ्ञात्-स’र्वहुतः’ । संभृ’तं पृषदाज्यम् ।
पशूग्-स्ताग्श्च’क्रे वायव्यान्’ । आरण्यान्-ग्राम्याश्च ये ॥
तस्मा”द्यङ्ञात्स’र्वहुतः’ । ऋचः सामा’नि जङ्ञिरे ।
छंदाग्म्’सि जङ्ञिरे तस्मा”त् । यजुस्तस्मा’दजायत ॥
तस्मादश्वा’ अजायंत । ये के चो’भयाद’तः ।
गावो’ ह जङ्ञिरे तस्मा”त् । तस्मा”ज्जाता अ’जावयः’ ॥
यत्पुरु’षं व्य’दधुः । कतिथा व्य’कल्पयन् ।
मुखं किम’स्य कौ बाहू । कावूरू पादा’वुच्येते ॥
ब्राह्मणो”स्य मुख’मासीत् । बाहू रा’जन्यः’ कृतः ।

ऊरू तद'स्य यद्वैश्यः' । पद्भ्याग्म् शूद्रो अ'जायतः ।।
चंद्रमा मन'सो जातः । चक्षोः सूर्यो' अजायत ।
मुखादिंद्र'श्चाग्निश्च' । प्राणाद्वायुर'जायत ।।
नाभ्या' आसीदंतरि'क्षम् । शीर्ष्णो द्यौः सम'वर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रा"त् । तथा' लोकाग्म् अक'ल्पयन् ।।
वेदाहमे'तं पुरु'षं महांतम्" । आदित्यव'र्णं तम'सस्तु पारे ।
सर्वा'णि रूपाणि' विचित्य धीरः' । नामा'नि कृत्वाभिवदन्, यदास्ते" ।।
धाता पुरस्ताद्यमु'दाजहार' । शक्रः प्रविद्वान्-प्रदिशश्चत'स्रः ।
तमेवं विद्वानमृत' इह भ'वति । नान्यः पंथा अय'नाय विद्यते ।।
यज्ञेन' यज्ञम'यजंत देवाः । तानि धर्मा'णि प्रथमान्या'सन् ।
ते ह नाकं' महिमानः' सचंते । यत्र पूर्वे' साध्यास्संति' देवाः ।।
अद्भ्यः संभू'तः पृथिव्यै रसा"च्च । विश्वक'र्मणः सम'वर्तताधि' ।
तस्य त्वष्टा' विदध'द्रूपमे'ति । तत्पुरु'षस्य विश्वमाजा'नमग्रे" ।।
वेदाहमेतं पुरु'षं महांतम्" । आदित्यव'र्णं तम'सः पर'स्तात् ।
तमेवं विद्वानमृत' इह भ'वति । नान्यः पंथा' विद्यतेय'नाय ।।
प्रजाप'तिश्चरति गर्भे' अंतः । अजाय'मानो बहुधा विजा'यते ।
तस्य धीराः परि'जानंति योनिम्" । मरी'चीनां पदमिच्छंति वेधसः' ।।
यो देवेभ्य आत'पति । यो देवानां" पुरोहि'तः ।
पूर्वो यो देवेभ्यो' जातः । नमो' रुचाय ब्राह्म'ये ।।
रुचं' ब्राह्मं जनय'ंतः । देवा अग्रे तद'ब्रुवन् ।
यस्त्वैवं ब्रा"ह्मणो विद्यात् । तस्य देवा असन् वशे" ।।
ह्रीश्च' ते लक्ष्मीश्च पत्न्यौ" । अहोरात्रे पार्श्वे ।
नक्ष'त्राणि रूपम् । अश्विनौ व्यात्तम्" ।
इष्टं म'निषाण । अमुं म'निषाण । सर्वं' मनिषाण ।।

तच्चं योरावृ'णीमहे । गातुं यज्ञाय' । गातुं यज्ञप'तये । दैवी" स्वस्तिर'स्तु नः ।
स्वस्तिर्मानु'षेभ्यः । ऊर्ध्वं जि'गातु भेषजम् । शं नो' अस्तु द्विपदे" । शं चतु'ष्पदे ।
ॐ शांतिः शांतिः शांतिः' ।।